"ईशा-केन-कठ-प्रश्न-मुण्ड-माण्डक्य-तित्तिरि" ॥)

कठमर्द्दः, पुं, (कठं कष्टजीवनं मृद्नातीति । कठ मृद्+अण् ।) शिवः । इति त्रिकाण्डशेषः ॥

कठरः,त्रि,(कठ+अरन् ।) कठिनः । इति जटाधरः ॥

कठशाखा,स्त्री, (यजुर्वेदान्तर्गता कठेन प्रोक्ता शाखा ।) यजुर्व्वेदस्य शाखाविशेषः । एतद्विवरणं वेदशब्दे द्रष्टव्यम् ॥

कठाहकः,पुं,(कठं कठिनमाहन्तीति । आ+हन्+डः । कठाहः तादृशं कं शिरो यस्य ।) दात्यूहपक्षी । इति शब्दरत्नावली ॥

कठिञ्जरः, पुं, (कठिं कठिनं जरयति । जृष वयोहानौ तस्मात् अण् । पृषोदरादित्वात् साधुः । यद्वा जृ+णिच्+बाहुलकात्+खच् मुम् च ।) तुलसीवृक्षः । तत्पर्य्यायः । पर्णासः २ कुठेरकः ३ । इत्यमरः । २ । ४ । ७९ ॥ ("लोणिका-जातुकपर्णिका-पत्तूर-जीवक-सुवर्च्चला-कुरुवक-कठिञ्जर-कुन्तलिका-कुरण्टिकाप्रभृतीनि" ॥ इति सुश्रुते द्रष्टव्यम् ॥)

कठिनं, त्रि, (कठ्+इनन् । उणादिमते तु इनच् । "बहुलमन्यत्रापि" । उणां । २ । ४ । ९ ।) कठरम् । तत्पर्य्यायः । कक्खटम् २ क्रूरम् ३ कठोरम् ४ निष्ठुरम् ५ दृढम् ६ जठरम् ७ मूर्त्तिमत् ८ मूर्त्तम् ९ । इत्यमरः । ३ । १ । ७६ ॥ खक्खटम् १० कठोलम् ११ जरठम् १२ । इति तट्टीका ॥ कर्करम् १३ कठरम् १४ । इति जटाधरः ॥ काठरम् १५ कमठायितम् १६ । इति शब्दरत्नावली ॥ स्तब्धम् । इति मेदिनी ॥ ("उन्मूलयंश्च कठिनान् नृपान् वायुरिव द्रुमान्" । कथासरित्सागरे १९ । ८९ ॥ तथा कुमारे ४ । ५ । "न विदीर्य्ये कठिनाः खलु स्त्रियः" ॥ अपि च "भक्ष्यांश्चातिकठिनान् दन्तरोगी विवर्ज्जयेत्" । सुश्रुते ॥)

कठिनं, क्ली, स्त्री, (कठ्+"बहुलमन्यत्रापि" । उणां २।४९ । इति इनच् ।) स्थाली । इति मेदिनीशब्दरत्नावल्यौ ॥

कठिनपृष्ठकः, पुं, (कठिनं पृष्ठकमस्य । पृष्ठ स्वार्थे संज्ञायां वा कन् ।) कच्छपः । इति राजनिर्घण्टः ॥

कठिना, स्त्री, (कठ+इनच् । स्त्रियां टाप् ।) गुड़शर्करा । इति विश्वमेदिन्यौ ॥

कठिनिका, स्त्री, (कठ+इनच्+गौरादित्वात् ङीष् स्वार्थे कन् । टापि ह्रस्वश्च ।) कठिनी । इति हारावली । खड़ी इति भाषा ॥

कठिनी, स्त्री, (कठिन+गौरादित्वात् ङीष् ।) खड़िका । इति मेदिनी । खड़ी इति भाषा ॥ तत्पर्य्यायः । पाकशुक्ला २ अमिलाधातुः ३ कक्खटी ४ खटी ५ खड़ी ६ वर्णलेखिका ७ । इति रत्नमाला ॥ धातूपलः ८ कठिनिका ९ । इति हारावली ॥ (तथा च हितोपदेशे १ । १८ । "गुणिगणगणनारम्भे न पतति कठिनी ससम्भ्रमाद् यस्य । तेनाम्बा यदि सुतिनी वद बन्ध्या कीदृशी नाम" ॥)

कठिल्लः, पुं, (कठति भोजने दुःखं उद्गमं वा गमयति । अतीवतिक्तत्वात् तथात्वं । कठ शोके इति धातोर्बाहुलकादिल्लप्रत्ययः ।) कारवेल्लः । इत्युणादिकोषः । करला इति भाषा ॥ (वाभटे शाकवर्गाणां मध्ये गणितम् ॥ यथा,—
"कठिल्लं केम्बुकं शीतं स कोषातक कर्कशम् ।
तिक्तं पाके कटुग्राहि वातलं कफपित्तजित्" ॥)

कठिल्लकः, पुं, (कठिल्ल+स्वार्थे कन् ।) कारवेल्लः । पुनर्णवा । तुलसी । इति त्रिकाण्डशेषः ॥

कठी, स्त्री, (कठेन प्रोक्तमधीते या शाखाध्येतृवाचित्वेन जातित्वात् ङीष् । कठप्रोक्तमधीयाना इत्यर्थः ।) ब्राह्मणी । इति जटाधरः ॥

कठेरः, पुं, (कठति कृच्छ्रेण जीवति जीविकां निर्व्वाहयति । "पतिकठिकुठिगड़िगुड़िदंशिभ्यएरक्" । उणां ।१। ५९ इति एरक् ।) कृच्छ्रजीवी । दरिद्रः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

कठोरः, त्रि, (कठति पारुष्यमाचरति । "कठिचकिभ्यामोरन्" उणां १।६५ । इतिकठ+ओरन् ॥) कठिनः । इत्यमरः । ३ । १ । ७६ ॥ (यथा, भागवते ३ । १९ । १५ ।
"प्रवृद्धरोषः स कठोरमुष्टिना
नदन् प्रहृत्यान्तरधीयतासुरः" ॥
दारुणः । तथाहि भागवते । ५ । १३ । ३ । "कठोरदंशैर्मशकैरुपद्रुतः" ॥ अतिविस्तृतः । तत्रैव ६ । १२ । २ । "युगान्ताग्निकठोरजिह्नः" ॥ पूर्णः । तथाहि ।
"स तप्तकार्त्तस्वरभास्वराम्बरः
कठोरताराधिपलाञ्छनच्छविः" ।
इति माघः । १ । २० ॥ "कठोरताराधिपस्य पूर्णेन्दोः" इति तट्टीकायां मल्लिनाथः ॥)

कठोलः, त्रि, (कठ+ओलच् "कपिगतिगण्डिकटिपटिभ्य ओलच्" उणां ।१। ६७ ।) कठोरः । इत्यमरटीकायां नीलकण्ठः ॥

कड इ ङ ञ दर्पे । हर्षे इत्यर्थः । इति कविकल्पद्रुमटीकायां दुर्गादासः । (भ्वां–आत्मं–अकं–सेट्–पक्षे उभं–इदित् ।) इ कर्म्मणि कण्ड्यते । ञ कण्डति कण्डते । ङ कण्डते जनो हृष्टः स्यादित्यर्थः । अयमात्मनेपदीत्यन्ये । कदाचित् परस्मैपदार्थो ञकारः । अनेकार्थत्वात् तुषापनयने च । (भ्वां–आत्मं–सकं ।) "कण्डते तण्डुलं लोकः" । इति दुर्गादासः ॥

कड श अदने । दर्पे । इति कविकल्पद्रुमः ॥ (तुदां–परं–सकं–दर्पे अकं–सेट् ।) श कड़ती कड़न्ती । प्राञ्चस्तु वेदे तूकारणभेदार्थं भ्वादावप्येवं पठन्ति । तथा च । "कड मद इति धातुः पठ्यते भूतुदाद्योः कड़ति कड़ति रूपं तुल्यमेव द्वयोः स्यात् । तदुभयगणपाठे किं फलं नेति वाच्यं स्वरकृत इह भेदः शपशयोरस्ति यस्मात्" इति । स्वरकृत इति उदात्तानुदात्तस्वरितत्रिरिक्तसंज्ञकचतुर्व्विधस्वरकृत इत्यर्थः । इति दुर्गादासः ॥

कड इ क भेदे । रक्षणे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट्-इदित् ।) इ कण्डयति । इति दुर्गादासः ॥

कड्डः, त्रि, (कड़ति माद्यतीति । कड़ मदे+पचाद्यच् ।) मूर्खः । इति हलायुधः ॥

कड़कं, क्ली, (कड्यते अद्यते इति । कड अदने+अच् संज्ञायां कन् । कर्म्मणि अप् स्वार्थे संज्ञायां वा कन् ।) लवणविशेषः । करकच् इति भाषा ॥ तत्पर्य्यायः । सामुद्रम् २ त्रिकूटम् ३ । इति रत्नमाला ॥ अस्य गुणाः सामुद्रशब्दे द्रष्टव्याः ॥

कड़ङ्गः, पुं, (कड़ं मादकताशक्तिं गमयति जनयति वा कड़ात् गमेर्डः । अन्तर्भूतो ण्यन्तो वा ।) सुराविशेषः । इत्युणादिकोषः ॥

कड़ङ्गरः, पुं, (कड़ात् भक्षणीयतण्डुलादेः सकाशात् ग्रियते क्षिप्यते दूरीक्रियते इति भावः । कड़+गिरतेः कर्म्मणि खच् । यद्वा कड़ं भक्षणीयं शस्यादि गिरति उद्गिरति आत्मनः सकाशात् । गृ+अच् ।) वुषं इत्यमरः । २ । ९ । २२ । आगड़ा इति भाषा ॥
("नीवारपाकादि कड़ङ्गरीयै-
रामृश्यते जानपदैर्न कच्चित्" ।
इति रघुः । ५ । ९ ॥ कड़ङ्गरं वुषम् अर्हन्तीति कड़ङ्गरीया इति तट्टीकायां मल्लिनाथः ॥)

कड़त्रं, क्ली, (गड्यते सिच्यतेऽत्र जलादिकम् । गड़+अत्रन् गड़ेरादेश्च कः ।) पात्रविशेषः । इति उणादिकोषः ॥ (गड्यते सिच्यतेऽनेन ।गड़+सेचने "गड़ेरादेश्च कः" उणाम् ।३।१०६ । इति अत्रन् प्रत्ययः ड़लयोरेकत्वस्मरणात् कलत्रम् ॥

कड़म्बः, पुं, (कड़+"ककादिकड़िकटिभ्योऽम्बच्" उणाम् । ४ । ८२ । इति कड़धातोरम्बच्प्रत्ययः ।) शाकनाड़िका । डाँटा इति भाषा ॥ तत्पर्य्यायः । कलम्बः २ । इत्यमरः । २ । ९ । ३५ ॥ कोणम् । प्रान्तभागः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (कलम्बशब्दे विशेषो ज्ञेयः ॥)

कड़म्बी, स्त्री, (कड़म्बः कलम्बो भूयसा विद्यते अस्याः । इति अर्शआदित्वात् अच् ततः गौरादित्वात् ङीष् ।) कलम्बीशाकम् । इति शब्दरत्नावली ॥ (कलम्बीशब्दे गुणादयोऽस्या वक्तव्याः ॥)

कड़ारः, पुं, (गड़ । सेचने इति+"गड़ेः कड़् च" । उणाम् । ३ । १३५ । इति आरन् कड़ादेशश्च धातोः ।) पिङ्गलवर्णः । तद्वर्णयुक्ते त्रि । इत्यमरः । १ । ५ । १६ ॥ (यथा माघः । ५ । ३ ।
"सविद्युदम्बरविकाशि चमूसमुत्थं
पृथ्वीरजः करभकण्ठकड़ारमाशाः" ॥)
कड़ारस्तृणवङ्गिवत् इत्यन्ये इति भरतः ॥ दासः । इति मेदिनी ॥

कड़ितुलः, पुं, (कट्यां तुला तोलनं ग्रहणं यस्य पृषोदरादित्वात् टस्य डः ।) खड्गः । इति शब्दरत्नावली ॥

कडु कार्कश्ये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) टवर्गतृतीयोपधः । क्विपि संयोगान्तलोपे कड् । कडुति पद्मम्हणालं कार्कश्यं स्यादित्यर्थः । इति दुर्गादासः ॥

कण क्क आर्त्तस्वरे । इति कविकल्पद्रुमः ॥ (भ्वां–